॥ श्रीः ॥

# श्री शंकरवेदान्ते चैतन्यम्

डॉ (श्रीमती) राधा कृष्णमूर्तिः

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्ताम्
संजीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥
दिक्कालाद्यनवाच्छिन्नानन्तचिन्मात्रमूर्तये
स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ॥

**विषयप्रवेशनम् : -**

इदंजगत् नानाविध जडचेतनस्थावरजंगमवस्तुभिः आपूरितम् । सर्वेषां वस्तूनां कर्मप्रवृत्तिः अस्त्येव। मनुष्यादिप्राणीनां तु विविधप्रकारक कर्मप्रवृत्तयः स्पष्टं दृश्यन्ते। अस्मिन् विषये कोऽपि संदेहो नास्ति । प्राणिवर्गः श्रोत्रा श्टणोति, चक्षुषा पश्यति, वाचा वदति, त्वचा स्पर्शति, मनसा च मनुते । प्राणिवर्गेषु विद्यमाना चेतनशक्तिरेव तान् विविधकर्मसु शारीरिक, मानासिक वाचिकादिषु कर्मसु प्रेरयति इति लौकिकेषु प्रसिद्धम् । एतत् समीचीनमपि। किन्तु जडस्थावरपदार्थानामपि कार्यप्रवृत्तिः दृश्यते यथा वृक्षलतादयः यत्स्थलेउद्भवन्ति

यधपि ते तत्रैव तिष्ठन्ति दिने दिने तु वर्धन्ते, तेषां शाखाः मूलानि च चतुर्दिशासु व्याप्नुवन्ति, ऋतुक्रमेण पल्लविताः पुष्पिता भूत्वा फलन्ति च । एवमेव निर्जोवाः आपः प्रवहन्ति, अग्निर्दहति, वायुर्वहति ।

मनुष्यमृगादयः चिदान्विता, पञ्चज्ञानेन्द्रियाणि पश्चकर्मेन्द्रियाणि मनःबुद्धिः इत्यादिकरणैः युक्ताः तैः सदा शारीरिकमानसिकव्यवहारं कुर्वन्त्येव । किन्तु स्वयं चैतन्यरहिता अपि जडपदार्थानामपि कर्मप्रवृत्तिः कस्मात् उत्पद्यते, किम् तच्चेतनवस्तु यत् अचेतनपदार्थानपि चेतयति, प्रेरयति ? अन्तरिक्षे चन्द्रनक्षत्रादिग्रहाः स्वग्रहपथेषु नियमबद्धाः संचरन्ति, को नु खलु तेषां नियामकः? ईदृशप्रश्नानां समाधानान्वेषणप्रयत्नः दीर्धकालादेव वैज्ञानिकैः, मनोवैज्ञानिकैः, मनीषिभिः सततं कृतम् । समाधानं तु अद्यापि नाधिगतम् । एते गूढप्रश्नाः एव । चेतनप्राणिष्वपि चैतन्यशक्तिः तेषाम् हृदये वर्तते वा या मस्तके, वा मस्तिष्के, करणेषु वा नाडिषु ? वैज्ञानिक रीत्या उत्तरं दातुम् कोऽपि न समर्थः। अधुनातनकाले तु विज्ञानक्षेत्रे दिने दिने उत्तरोत्तराभिवृद्धिः दृश्यते । चन्द्रग्रहे पदार्पणं कृतम् मानवेन । अन्तरिक्ष उपग्रहान् स्थापयित्वा विश्वस्य सूक्ष्मवस्तूनामपि ज्ञानं सर्वसुलभं कृतम्। परन्तु किं नु खलु तत् शुद्ध - चैतन्यवस्तु यस्मात् विश्वस्मिन् सर्वेषां कार्यप्रवृत्तिः संभवति इत्ययं प्रश्नः प्रश्नरुपेणैव अद्यापि वैज्ञानिकयुगे तिष्ठति। अपितु अस्त्यस्य प्रतिवचनं वेदोपनिषत्सु आचार्याणां भाष्येषु, इतरधार्मिक ग्रन्थेषु।

**चैतन्यनिरूपणम् :**

मनआदीनां इन्द्रियाणां प्रवृत्तिं दृष्ट्वा सामान्यचेतनस्याधिगमः जनानां भवति। अपितु तत्सामान्यचेतनस्यापि कोऽपि अधिष्ठाता वर्तते इतीदं ज्ञानं तेषां न भवति।

प्रत्यक्षप्रमाणाभावात् अज्ञानाच्च सामान्यजनाः सर्वेषां प्रेरक अधिष्ठाता एको वर्तते इत्यास्मिन् विषये विश्वासं न कुर्वन्ति। मनआदीनां अचेतनपदार्थानामपि प्रवृत्तिषु तेषां प्रेरकस्यापि अस्तित्वं आवश्यकमेव। प्रेरकशक्तिं विना प्रवृत्तिः न सम्भवति। रथादीनां अचेतनपदार्थानामपि प्रवृत्तिः चेतनप्राणिभिः अधिष्ठिता दृश्यते। तथैव चेतनावतः अधिष्ठातुः अस्तित्वे एव मनआदि अचेतनानामपि प्रवृत्तिः संभवति। अतः प्राणीनां कर्मप्रवृत्तेः महत्वं मनसीकृत्य चेतनसंपन्नस्य अधिष्ठातुः अस्तित्वं निरुपयितुम् अद्वैतमतप्रवर्तकः जगद्गुरु श्रीशंकराचार्यः एवं उक्तवन्तः - "प्रवृत्तिलिंगाद्विशेषार्थः प्रश्नः उपपन्नः"। वाक्येनानेन सूचितं पदार्थानां प्रवृत्ति एव चिन्मयाद्यिष्टातुः अस्तित्वस्य अनुमापकं लिङ्गं भवति। केनोपनिषदः प्रथममंत्रस्य भाष्ये आचार्येण विचारोऽयं स्पष्टीकृतः। जीवजन्तूनां सर्वाणिइन्द्रियाणि नियमपूर्वकं स्वकार्यं कुर्वन्ति। श्रोतृ श्रृणोति, चक्षुः पश्यति, वाक् वदति, त्वक्स्पृशति, घ्राणं जिघ्रति, मनःमनुते। कर्मेन्द्रियाण्यपि स्वकार्यं कुर्वंन्त्येव। कोऽपि तेषां कस्यचित् प्रेरकस्यास्तित्वं अपि अनुभूय केनोपनिषदः प्रारंभे प्रश्नं करोति : -

केनेषितं पतति प्रेषितं मनः। केन प्राणः प्रथमं प्रैति युक्तः। केनेषितां वाचमिमां वदन्ति। चक्षुः श्रोत्रं क उ देवो युनक्ति।

शिष्यः पृच्छाति, मन आदि करणजातस्य को देवः, तेषां स्वविषयं प्रति को प्रेरयिता, कथं वा स प्रेरयति इति।

अस्मिन् संदर्भे भाष्यकृत् शंकराचार्यः आत्मज्योतिः एव सर्वाणि कर्माणि प्रेरयति, अपितु इन्द्रियादीनां प्रवत्तौ तन्निमित्तमात्रं इति स्वमतं समर्थयितुम् प्रथमं तावत् इषितप्रेषित शब्दयोः अर्थो स्पष्टीकुर्वन्ति। शब्दयोः मुख्यार्थौ अत्र न

संभवतः । आत्मा तु मनआदीनि करणानि स्वविषयेभ्यः शिष्यानिव न प्रेरयति। आत्मा तु विविक्तः नित्यचित् - स्वरुपः, अतः नित्यचिकित्सायाः अद्यिष्टातृवत् करणानां प्रवृत्तौ निमित्तमात्रम् । राजानः यदा भोजनं कुर्वन्ति तदा भोजने विषमिश्रणस्य संदेहोऽपि वर्तते । तत्परीक्षणार्थं भोजनसमये चकोरपक्षिणं समक्षं स्थापयन्ति । भोजने विषमिश्रणं स्यात् चकोरपक्षिणः चक्षुषोः वर्णपरिवर्तनं भवति। अतः पक्षिणः सान्निध्यमात्रेण निर्भयेन भोजने राज्ञां प्रवृत्तिः संभवति । पक्षी तु स्वयं किञ्चिदपि न करोति, अपितु स्वसान्निध्यमात्रेण राज्ञः भोजने प्रवर्तयति। तथैव नित्यचित्स्वरुपः सर्वेषां करणानां प्रवृत्तौ निमित्तमात्रो भूत्वा तेषां अधिष्ठाता भवति ।मनः स्वतन्त्रं प्रवृत्तिनिवृत्तिविषये स्वयं पतति इति लौकिकेषु प्रसिद्धम् । मनसः प्रवृत्तौ नित्यचित्स्वरुपस्य कीदृशी भूमिका स्यात् इत्ययं प्रश्नोऽपि उत्पद्यते। एतत्संदेहनिवारणार्थं मनप्रभृतीनां पारतन्त्र्यं युक्तिपूर्वकं दर्शयित्वा मनसः प्रेरकोऽपि चिन्मयात्मा इति सूचितम् । मन आदिषु चलनक्रिया प्राणस्यैव, प्राणनिमित्तत्वादेव । अतः सर्वेन्द्रियप्रवृत्तयः प्राणपूर्वका इत्यपि आचार्यैः प्रकटितम् । प्राणसहितसर्वेन्द्रियाणां को प्रयोक्ता इत्यादीन् संशयान् दूरीकर्तुं केनोपनिषद द्वितीयमंत्रस्य भाष्ये आत्मनः सर्वनियन्तृत्वं तर्करीत्या निरुपितम् आचार्यैः । श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्मात्मा इति विदित्वा श्रोत्रात्मभावं परित्यज्य धीमन्तः अस्मात् लोकात् प्रेत्य अमृतत्वं आप्नुवन्ति इति निर्दिश्य परमाचार्येषा इदमपि स्पष्टीकृतम् यत् इदम् प्रतिवचनं निर्विशेषस्य आत्मनः निमित्तत्वबोधनायैव उक्तम् । विक्रियादि विशेष रहितस्य आत्मनः एव मन आदीनां प्रवृत्तिषु निमित्तमस्ति ।

श्रोत्रादीनि इन्द्रियाणि स्वविषयव्यञ्जनसामर्थ्येन युक्ता एव । तत्सामर्थ्यमपि चैतन्ये आत्मज्योतिषि नित्ये असंहते सर्वान्तरे सति भवति न असति । अतः

असंहतम् सर्वान्तरं नित्यं आत्मज्योति चैतन्यमेव श्रोत्रादीनि सर्वाणि इन्द्रियाणि स्वंविषयेषु प्रवर्तयति, चैतन्यस्य सान्निध्ये एव इन्द्रियाणां स्वविषयव्यञ्जन सामर्थ्यमस्ति । नान्यथा इति श्रोत्रस्य श्रोत्रम् इत्यादिश्रुतिवाक्यैः प्रमाणीकृतम् शंकरभगवत्पादैः ॥ अन्तःकरणम् तु मनःबुदिश्च । चैतन्यज्योतिषः प्रकाशं विना स्वविषयसंकल्प अध्यवसायादिषु तत् समर्थं न भवति । अतः आत्मचैतन्येनाधिष्टितस्य कारणादेव सर्वकरणानि स्वविषयग्रहणसामर्थ्येन संपन्नानि । श्रोत्रादिकरणकलापस्य प्रवृत्तिः विषयावभासमात्रम् । विषयोपलब्धृरुपतया इन्द्रियाणां अवभासकत्वम् न विद्यते तेषां अचित्रुपत्वात् चिद्रुपस्य आत्मनः निमित्तत्वात् च । श्रोत्राद्युपलब्धिनिमित्तभूतं नित्योपलाब्धिस्वरुपं निर्विशेषमात्मतत्त्वं नित्यचेतनवस्तु सर्वेषां प्रेरकम् । तदेव शुद्धचैतन्यं यस्य ज्ञानेन अमृतत्वं प्राप्यते । श्रोत्रादि इन्द्रियाणामपि इन्द्रियं इत्यादिवाक्यैः निर्दिष्टः सर्वविशेषरहितः सर्वात्मा चिन्मयज्योतिः इति स्वमतप्रतिपादनान्तरं तस्यैव चिन्मात्रज्योतिषः ब्रह्मत्वमपि श्रुतिप्रमाणैः दर्शयित्वा आचार्योपदेशपरंपरया एव तदधिगन्तव्यम् न तर्कतः प्रवचनमेधाबहुश्रुततपोयज्ञादिभ्यश्च इत्यपि श्री शंकराचार्यैः उक्तम् ।

मनस्तु सर्वविषयव्यापकत्वात् सर्वकरणसाधारणम् । कामादिवृत्तिमत् मनः इति उच्यते । कामः, संकल्पो विचिकित्सा श्रद्धाश्रद्धाधृतिरधृतिः ह्रीः धीः इत्येतत् सर्वं मन एव । मनसा चैतन्यज्योतिः न मनुते, चैतन्यस्य नियन्तृत्वात्, अवभासकत्वात् च । अन्तस्थेन चैतन्यज्योतिषा एव अवभासितस्य मनस एव मननसामर्थ्यम् । सर्वविषयं प्रति प्रत्यगेवेति स्वात्मनि न प्रवर्तते अन्तःकरणम् । मनश्च अन्यस्य संकल्पयितृ, अध्यवसायितृ च, नात्मानं संकल्पयति अध्यवस्यति

च । अतः सवृत्तिकं मनः ब्रह्मणा विषयीकृतं अथवा व्याप्तं इति निश्चितम् । तस्मात् येन ब्रह्मणा मनः व्याप्त तदेव आत्मा प्रत्यक्चेतयितृ चैतन्यज्योतिः ब्रह्म इति श्री शंकराचार्यैः स्वमंत दृढीकृतम् ।

**चैतन्यं ब्रह्मलक्षणम् :**

एतस्य उपनिषदःऋषिः ब्रह्मणः लक्षणं प्रकाशयति "प्रज्ञानं ब्रह्म" इति । अयं ऋग्वेदान्तर्गत महावाक्यः । प्रज्ञानं तु चैतन्यमेव । तृतीयाध्यायस्य अयं मन्त्रः -

"कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा येन वा पश्यति येन वा श्रृणोति येनवा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति" यस्योपासनं कृत्वा आचार्यः वामदेवः अमृतः समभवत् इत्येतत् विषयमधिकृत्य ब्रह्मजिज्ञासवः विचारवन्तः अन्योन्यं पृच्छन्ति कोऽयमात्मेति । अस्य पिण्डस्यात्मभूते द्वे ब्रह्मणी इतरेतर प्रातिकूल्येन प्रतिपन्ने । तयोः अन्यतर आत्मा एव उपास्यो भवितुमर्हति । कोनुखलु स आत्मा इति निर्धारिणं आवश्यकमिति मत्वा शंकराचार्यैः तत्संबधीव्याख्यात्मक विवरणं दत्तम् 'प्रज्ञानंब्रह्म' एतत् महावाक्यमपि समर्थितम् । अस्मिन् पिण्डे द्वे वस्तुनि उपलभ्येते । एकं तु अनेकभेदभिन्नं अन्तःकरणं येन उपलभते । अपरं तु तत् यत् उपलभते यत् उपलब्धृ भवति । करणान्तरैः उपलब्धविषयाणां स्मृत्यादिभिः प्रतिसन्धानं करोति अन्तःकरणम् । तत्र तावत् येन उपलभते स आत्मा भवितुं नार्हति । अपरः एव अर्थात् उपलब्धा एव आत्मा भवति ।

अन्तःकरणेन चान्तर्भूतेन मनुष्यः रूपं पश्यति, श्रोत्रभूतेन श्रृणोति, घ्राणभूतेन पश्याति। अतः तदेकं करणं अनेकधाभिन्नं इति स्पष्टम् । कथं तत् संभवति

इत्येतत्प्रश्ने उपस्थिते श्रीशंकराचार्यैः स्वमतं प्रकटितम् । पुरा इदमुक्तं प्रजानां रेतो हृदयः, हृदयस्य रेतो मनः, मनसा सृष्टा आपः वरुणश्च । हृदयात् मनः, मनसः चन्द्रमाः । तदेव एतत् हृदयं मनश्चः । अतः एकमेव अनेकधा यद्भिन्नं भवति तदन्तःकरणम् । एकेन अन्तःकरणेन चक्षुर्भूतेन मनुष्यः रूपं पश्यति, श्रोत्रभूते श्रृणोति, घ्राणभूतेन जिघ्रति, वाग्भूतेन वदति, जिह्वाभूतेन रसयति, स्वेनैव संकल्पविकल्परुपेण मनसा विकल्पयति, हृदयरूपेण अध्यवस्यति । तस्मात् उपलब्धुः समस्तोपलब्ध्यर्थं सर्वकरणविषयव्यापारकं एकं अन्तःकरणमेव । श्रुतिवाक्यैरपि एतत् समर्थितम् । यथा कौषीतकी उपनिषदि "प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञाचक्षु; समारुह्य चक्षुषा सर्वाणिरूपान्याप्नोति" ।। बृहदारण्यके च उत्तम्।

"मनसा ह्येव पश्यति, मनसा श्रृणोति, हृदयेन हि रूपाणि जानाति" ।

अतः हृदयमनोवाच्यस्य अन्तःकरणस्य सर्वोपलाब्धिकरत्वम् सिद्धम् । तदात्मकः एवप्राणः । उक्तम् च योवै प्राणः साप्रज्ञा या वैप्रज्ञा स प्राणः । करणसंहतिरुपः प्राणः । प्राणः उपलब्धुः उपलब्धिकरणत्वेन गुणभूतत्वाच्च उपास्यात्मा भवितुम् नार्हति । यस्य उपलब्ध्यर्थं एतस्य हृदयमनोरुपस्य अन्तःकरणस्य वृत्तयः भवन्ति स उपलब्धा एव उपास्यात्मा । अन्तःकरणम् उपाधिमात्रम् । तस्मिन् स्थितं प्रज्ञारुपी एकंब्रह्म हि उपलब्धा । तस्य उपलब्ध्यर्थं बाह्यान्तर्वर्तीविषयैः सम्बन्धिताः अनेकाःवृत्तयः सन्ति । संज्ञानं तु संज्ञप्ति अर्थात् चेतनभावः । आज्ञानं आज्ञप्तिः ईश्वर भावः (प्रभुता) । विज्ञानं कलादीनां परिज्ञानम् । प्रज्ञानं प्रज्ञप्तिः अथवा प्रज्ञता । मेधा तु ग्रन्थधारण सामर्थ्यम् । दृष्टि इन्द्रियद्वारा सर्वविषयोपलब्धिः । धृतिस्तु धारणं अनया अवसन्नानां शरीरेन्द्रियाणां

उत्तम्भनं भवति । मतिः मननम्, मनीषा तु तत्र स्वातंत्र्यम् । चेतसो रुजादि दुःखित्व भावः जूतिः । स्मृतिः स्मरणम्, शुक्लकृष्णादिभावेन रुपादीनां संकल्पनम् । अध्यवसायः क्रतुः। असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः कामोऽप्राप्तविषयाणां आकांक्षा । वशः स्त्री संसर्गादीनां अभिलाषा । इत्येवमाद्याः अन्तःकरणवृत्तयः प्रज्ञप्तिमात्रस्य उपलब्धुः उपलब्ध्यर्थत्वात् शुद्धब्रह्मण उपाधिभूतत्वाच्च उपाधिजनितगुणनामधेयानि भवन्ति । किन्तु एता प्रवृत्तयः साक्षात् ब्रह्म न भवन्ति । एतद्विवरणेन स्पष्टं भवति सर्वशरीरस्य; प्राणः प्रज्ञात्मा अपरंब्रह्म एव । प्राणः जलभेदगतसूर्यस्य बिम्बवत् अन्तःकरणोपाधिषु अनुप्रविष्टः उपास्यात्मा भवितुम् नार्हति । तस्मात् सर्वात्मा, सर्वविशेषरहितं चिन्मात्रज्योति हि ब्रह्म इति प्रतिपादितम् ।

इन्द्रात् प्रभृति अचलस्थावरपर्यन्तं अशेषतः सर्वं प्रज्ञानेत्रम् । ऐतरेयउपनिषदः वाक्यमिमं स्पष्टीकृत्य श्रीशंकराचार्यैः स्वमतं प्रकटितम् । प्रज्ञा तु प्रज्ञप्तिः, तत् ब्रह्मैव । प्रज्ञानेत्र पदस्य विग्रहं कृत्वा आचार्यःदर्शयति कथं सर्वं प्रज्ञाननेत्रमिति। नीयते अनेन इति नेत्रम् । यस्य प्रज्ञाननेत्रं तत् प्रज्ञानेत्रम् । प्रज्ञाने ब्रह्मणि उत्पत्तिस्थितिलयकालेषु प्रतिष्टितं प्रज्ञाश्रयमेव प्रज्ञानेत्रम् । सर्वजगतः प्रतिष्ठा प्रज्ञा । सर्वं प्रज्ञानेत्रम्, प्रज्ञाचक्षुः । तस्मात् प्रज्ञानं ब्रह्म । एतत् समस्तौपाधिकविशेष रहितं नित्यं, निरञ्जनं, निर्मलं शांतं एकमद्वयम् ब्रह्म तदेव शुद्धचैतन्यम् । तदेव सर्वेषां प्रेरकः कार्यप्रवर्तकः । तद्विना तृणमपि न चलति ।

**शुद्धबोधः बोधाभासश्चः**

भगवान् श्री शंकराचार्यः ब्रह्मविद्यां संक्षेपतः उपदेष्टुकामः सर्वप्रथमं शुद्धब्रह्म

उपाधिस्थ ब्रह्मणः कथं विशिष्यते ? तथो; को प्रभेदः इत्यादीन् विषयान् आधारपुर्वकम् प्रकाशितवन्तः। आत्मनः उपाधित्रयमस्ति । तेषु प्रथमः स्थूलोपाधिः मांसरक्तास्थिप्रधानः देहः । लिंगदेहः सूक्ष्मोपाधि इति उच्चते स तु वासनाप्रधानः । लिंगशरीरं तु सप्तदशकलात्मकं यथा धीः मनः, प्राणादयः पञ्चवृत्तयः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि च । अज्ञानं आत्मनः तृतीयोपाधिः । तदात्मनः कारणोपाधिः । उक्तानां त्रयाणामपि उपाधीनाम् विभासकं;, सत्तास्फूर्तिप्रदानात् प्रकाशकम् तत्रस्थितं शुद्धब्रह्मस्वरुपमेव । सः साक्षात् ईक्षते । अतः स एव साक्षी शुद्ध बोधः, विभासकः शुद्धचैतन्यः । एषैव शुद्यात्मनः स्वरुपः । उपाधिस्थ ब्रह्म तु जीवात्मा संसाराभिमानवाहकः बोधाभासः एव । स पुण्यपापकर्मणां कर्ता, स्वरुपबिंबितः चिदाभासः । किमर्थं उपाधिस्थं ब्रह्म बोधाभास इति कथ्यते इति पृष्टे बुद्धौ सत्वस्य प्रधानतया सा विशुद्धपारदर्शक वस्तु इति मन्यते । एतत्कारणात् बुद्धिः शुद्धचैतन्यस्य स्वयं विभात्यस्य प्रतिबिंबं गृहीत्वा चैतन्यस्य धर्ममपि उपलभंते । स एव चैतन्यप्रतिबिंबितः जीवः बोधाभासः। बोधाभासात् शुद्धबोधस्य यन्त्रपूर्वकं विवेचनं साधनामार्गे अत्यावश्यकमिति आचार्यैः उपदिष्टम्। प्रारब्धकर्मवशात् जीवात्मा इहामुत्र च सुखदुःखभोक्तृत्वादिरुपं संसारं अनवरतं अनुभवति। अतः बोधाभासः जीव तु शुद्धचैतन्यं भवितुं न शक्नोति। एतत्कारणात् शुद्धबोधकूटस्थं जीवात् अतिप्रयत्नेन विविच्यात्। अपि च परमानन्दघने परमार्थसत्ये साक्षिणि सति अविद्याकल्पितं उपाधिजातं साक्ष्यं नास्त्येव, तस्य मिथ्याभासकत्वात्। केवलो साक्षी एक एव विद्यते परमार्थसत्यः। विवेकदृष्ट्या एव शुद्धमात्मानं जानीयात् । स एव शुद्ध चैतन्यः, सर्वभासकः सर्वप्रेरकः प्रेषकश्श्च ।

**अवस्थात्रये चैतन्यम् :**

मनुष्यस्य जागरितस्वप्नसुषुप्ति इति तिस्रः अवस्थाः भवन्ति । एतासु अवस्थासु शुद्धचैतन्यस्य प्रवृत्तिः कीहशी ? कथं वा स प्रेरयति ? जागृतस्वप्नावस्थयोः जीवात्मनः बोधाभासस्यैव तत्र व्यवहारः। सुषुप्तावस्थायां तु चिदाभासस्य लयं भवति । तदवस्थायां शुद्धबोधः कूटस्थः जाड्यमज्ञानं च प्रकाशचेत् । सुप्तौ भासकबुद्धि सहितं बोधाभासस्यापि लयं भवति । तदा शुद्धकूटस्थचैतन्यं निर्विकारतया तिष्ठति । सुप्तौ मनुजः किञ्चिदपि न जानाति अर्थात् तदवस्थायां शुद्धचैतन्यं अज्ञानमेव प्रकाशयति। जागृतावस्थायामपि यदा यदा बुद्धिः तूर्ष्णी तिष्ठति यदा तस्य तूर्ष्णीभाव अस्ति तदा सा अविकारीचैतन्येन कूटस्थेन एव भास्यते । तस्मिन् समये अंतःकरणं वृत्तिरहितं भवति । वृत्तिरहितत्वात् शुद्धचैतन्येन तदनुभूयते । सवृत्तिकं अन्तःकरणं चैतन्यद्वयेन अर्थात् शुद्धचैतन्येन चिदाभासेन चापि अवभास्यते । निर्विकारसविकरचैतन्य द्वयेन सवृत्तिकं अन्तःकरणं भास्यते । निर्वृत्तिकं अन्तःकरणम् तु केवलेन निर्विकार चैतन्येनेकेनेव भास्यते। निर्विकार चैतन्यभास्याः धीव्यपाराश्च बुद्धिवृत्तयः चिदाभासेनापि संयुता भूत्वा धीस्थजीवेन सहिताः भास्यन्ते।

**बाह्यपदार्थोपलब्धिः**

बाह्यपदार्थोपलब्धिः कथं भवति इत्यस्य प्रश्नस्य उत्तरं श्रीशंकराचार्यैः श्लोकरूपेण एवं प्रदर्शितम्

वह्नितप्तजलं तापयुक्तं देहस्य तापकम् ।<br>
चिद्भास्या धीः तदाभासयुक्तान्यं भासयति ॥

अन्तःकरणं चैतन्यद्वयेन भासितं भवति । यदा जलं वह्निना तप्तं भवति तदा

तत्तापयुक्तं जलं शरीरतापकञ्च भवति । तथैव यदा बुद्धिः चिदाभास्या अर्थातम् कूटस्थचैतन्येन प्रकाशिता भवति तदा चिदाभासेनापि प्रकाशिता भूत्वा धटादि अन्यं विषयं भासयति । कूटस्थचैतन्येन चिदाभास चैतन्येन च प्रकाशितया बुध्या घटादि विषयाणां ज्ञानं उत्पाद्यते । प्रथमं कूटस्थचैतन्येन प्रकाशिता बुद्धिः तदाभासयुक्तापि भवति । चिदाभासा प्रकाशिता भूत्वा स्वयं अन्यं प्रकाशयति।

मनुष्यः रूपादिविषयैः सह तेषां गुणदोषानपि पश्यति । बुद्धिः विषयेषु गुणदोषानपि विकल्पयति । बुद्धिगाः क्रियाः मनोव्यापारा एव रुपादौ गुणदोषादीन् विकल्पयन्ति । रुपादिषु विषयेषु गुणदोषादिविकल्पाः भवन्त्येव । इदं समीचीनं इदमसमीचीनं इत्यादिकल्पनं मनोव्यापारैः एव कृतम् । न तु चैतन्यकृतम् । विषयेषु गुणदोषकल्पनं चैतन्यकृतमिति अयं विचारः भ्रमोद्भूतः एव । शुद्धचैतन्यं निर्विकारं । अतः गुणदोषकल्पने विषयैः सह गुणदोषानपि केवलं भासयति । शुद्धचैतन्यं स्वयमप्रकाशरुपं असत्जड़परिच्छिन्नरूपैः अन्तःकरणादिधर्मैः अस्य सविकारिता न संभवति । अन्तःकरणादीनां धर्माः तु असत् केवलाचितिः स्वयं प्रकाशा उपाधिरहिता च । रूपादिविषयाभ्यां तत्रस्थाभ्यां गुणदोषाभ्यां च केवला चितिः विविक्ता भवति । रुपरसादि विषयाणां विकल्पने अथवा पृथक्त्वग्रहणे अंतकरणादि उपाधिवशात् अनुवर्तते (भासकरुपेण) । अतः गुणदोषादि कल्पनं न स्वतः शुद्धचैतन्यस्य तस्य विकाराभावात्, अन्तःकरणादीनां उपाधिवशात् च। श्रुतयः आत्मनःस्वयंप्रकाशत्वं बोधयन्ति खलु : - अत्रायं पुरुषः स्वयंज्योतिर्भवति इत्यादि ।

**बुद्धिवृत्तिषु चैतन्यम्**

जडपरिणामिदृश्येभ्यः बुद्धिवृत्तिभ्यः चिदानन्दधनं अपरिच्छिन्नं साक्षीस्वरूपं

भिन्नमेव दृश्यते। बुद्धिवृत्तयः क्षणेक्षणे परिणामिनो दृश्यन्ते, चितिः (शुद्धचैतन्यं) तु न तथा । कुतः इति पृष्टे आत्मचैतन्यस्य परिणामाभावात् । मुक्ताफलेषु यथा सूत्रं अनुस्यूतं तथैव बुद्धिवृत्तिषु चैतन्यं अनवरतं अनुस्यूतमेव स्थितम् ।

"क्षणे क्षणेऽन्यथाभूता धीविकल्पाश्चितिर्नतु ।
मुक्तासु सूत्रवत् बुद्धि विकल्पेषु चितिः स्थिता"।

अपि च, मुक्ताभिरावृतं सूत्रं द्वयोः मुक्ताफलयोः मध्येदृश्यते, स्पष्टं प्रकाशते। तथैव विकल्पैः बुद्धिवृत्तिभिः आवृतं कूटस्थ चैतन्यं बुद्धिवृत्योः मध्ये स्पष्टा प्रकाशते। अर्थात् अत्र शुद्धचैतन्यात्मकं कूटस्थस्वरूपं स्पष्टं अनुभूयते। उक्तं च विद्यारण्यश्रीपादैः पञ्चदशी प्रकरण्याम् : -

संधयोऽखिलवृत्तीनामभावाश्चावभासिताः ।
निर्विकारेण येनासौ कूटस्थ इति चोच्यते ॥

अतः बुद्धिवृत्तीनां संधिषु, तेषां अभावे च कूटस्थशुद्धचैतन्यानुभवः भवति। बुद्धिवत्तिरुपे पूर्वविकल्पे नष्टे सति यावत् बुद्धिवृत्तिरुपस्य अन्यस्य विकल्पः न भवति तावत् शुद्धात्मस्वरूपं निर्विकल्पकचैतन्यं विभासते । अत्र निर्विकल्पचैतन्यं शुद्धात्मस्वरूपं तु 'तत्त्वमसि' महावाक्यस्य शुद्धत्वं पदलक्ष्यं तदेव विभासते इति श्रीशंकराचार्यैः सूचितम् । अर्थात् निर्वृत्तिकं अन्तःकरणं शुद्धचैतन्यरूपेण अनुभूयते । पूर्वमपि निदिष्ट जागरेऽपि धियः तूष्णीभावः शुद्धचैतन्येन भास्यते इति । उक्तं च आचार्यैः : -

"नष्टे पूर्वविकल्पे तु यावदन्यस्य नोदयः ।
निर्विकल्प चैतन्यं स्पष्टं तावत् विभासते ॥"

ब्रह्मानुभव प्राप्त्यर्थं अन्तःकरणस्य विकल्पनस्य निरोधनमेव परमोपायः इति दर्शितं आचार्यैः। ब्रह्मानुभवकांक्षिभिः मुमुक्षुभिः एकद्वित्रिक्षणेन अनुक्रमेण अन्तःकरणवृत्तिमात्रस्य निरोधनस्य अभ्यासः कर्तव्यः । अभ्यासेन अन्तःकरणं निवृत्तिकं कृत्वा ज्ञानी शुद्धचैतन्यानुभवं प्राप्नोति। जीवः तु सविकल्प चैतन्यरूपः। सोऽपि अभ्यासवशात् अनुक्रमेण अन्तःकरणं निर्वृत्तिकं कृत्वा ध्यानादि उपायैः निर्विकल्पकं शुद्धबोधस्वरूपं एकं अखण्ड ब्रह्मैव भवति इति जगद्गुरु शंकराचार्यैः दर्शितम् ।

**कार्यप्रतृत्तयः**

इन्द्रियाणां कार्यप्रवृत्तयः कथं भवन्ति इत्येतत् विषयं अधिकृत्य श्री शंकराचार्यैः आत्मबोध प्रकारणे स्पष्टं उक्तम् ।

"आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः।
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथाजनाः ।।"

आत्मा तु कार्यं न करोति । तमाश्रित्य एव सर्वाणि कर्माणि संभवन्ति । आत्मचैतन्यं तु न कर्मणां कर्तृ न कर्मफलानां भोक्तृ। जनानां स्वकीयकार्येषु सूर्यस्य प्रकाशः आवश्यकः। सूर्यालोकः एव जनान् स्वकार्येषु प्रवर्तयति । तथैव आत्मचैतन्यं लोकानां सर्वव्यवहारेषु आवश्यकम् । यदा सूर्यो भाति सर्वे जीवजन्तवः स्वकीयकार्येषु प्रवर्तन्ते, सूर्यस्तु तेषां कर्मणां न कर्ता न च तेषां कर्मफलैः अभिभूतः । तथैव आत्मचैतन्यमपि सर्वव्यवहार प्रेरकम् प्रवर्तकः किन्तु तेषु न बद्धः । चिन्मय आत्मा तु अमलः, अविवेकेन जनाः तस्मिन् देहेन्द्रियगुणान् कर्माणि च अध्यस्यन्ति यथा गगने नीलादिवर्णाः आरोपिताः । अर्कस्य प्रकाश

इव तोयस्य शैत्यमिव अग्नेः उष्णता इव निर्मलता चिदानन्दस्यस्वभावः । तदात्म-चैतन्यमाश्रित्य हि इन्द्रियाणि स्वकीयकार्येषु वर्तन्ते ।

'अहं जानामि' इति बोधः कथं उत्पधते ? अस्य विवरणमपि शंकराचार्यैः-स्पष्टीकृतम् । उक्तं च'

"आत्मनः सच्चिदंशः बुद्धेः वृत्ति इति द्वयम् ।
तौ अविवेकेन संयोज्य जानामि इति प्रवर्तते ॥"

अज्ञानात् अध्यवसायस्य कारणादेव "अहं जानामि" इति प्रवर्तते । अत्र 'अहं' तु अहंकार एव, ज्ञानं (बोधः) तु आत्मनः स्वभावः । चिदात्मा बुद्धौ प्रकाशते । अज्ञानात् एतत् चिदाभासं चिदंशे अध्यवसति । एतत्कारणात् 'अहंजानामि' इति बोधः उत्पद्यते । आत्मा तु चैतन्यः तस्य विक्रिया नास्ति । बुद्धेः तु बोधः नास्ति । शुद्धचैतन्यस्यैव प्रकाशः बुद्धौ भासितः । अज्ञानेन, अविवेकेन तदेव मूलचैतन्यमिति मत्वा जीवः स्वयमेव कर्ता, द्रष्टा इति मुह्यति ।

आत्मा तु स्वयंज्योतिः । जडवस्तुभिः न अवभास्यते । आत्मा एक एव बुद्यादीनि इन्द्रियाणि भासयति यथा दीपः घटादीन् । उक्तं च

यद्भासा भासतेऽर्कादि भास्यैर्यस्तु न भास्यते
येन सर्वमिदं भाति ब्रह्मेत्यवद्यारयेत् ॥

श्री शंकराचार्यैः स्पष्टं सूचितं सूर्यादिग्रहा अपि जडा एव । शुद्ध चैतन्यवस्तु एव ज्योतिष्मतां तेषां भासकः । प्रकाशनं सूर्यादीनां कर्म । तेषां प्रकाशनादिक कर्मप्रवृत्तयः अपि शुद्ध चैतन्येनैव संभवन्ति । शुद्धचैतन्यमेव अन्तर्बहिश्च सर्वत्र व्याप्य अखिलं भासयति । सर्वान् स्वकीयकर्मसु प्रेरयति, प्रवर्तयति सर्वत्रव्याप्तं चिदानन्द स्वरूपं चैतन्यम् ।

स्वयं अन्तर्बहिव्याप्य भासयन् अखिलं जगत्

ब्रह्मप्रकाशते वह्निप्रतप्तायस पिण्डवत् ।

चैतन्यम् एतत् विषयः अति गूढः सामान्यजनानां दुग्राह्यः आध्यत्मिकाभ्यासेनैव अधि गम्यते । जिज्ञासु शिष्याणां सुखबोधनाय अद्वैतसिद्धान्तप्रतिपादनार्थं च चैतन्यं ब्रह्मस्वरुपं इति तथ्यं मथितम् शंकराचार्यैः। वृत्तिरहितांतःकरणे शुद्धचैतन्यस्वरूपं अनुभूयते, अतः वृत्तिरहितं अंतःकरणं कृत्वा आत्मसुखं अखण्डं अनुभूयताम् इत्ययमेव लोकहितैषी जगद्गुरुशंकराचार्याणाम् अमृतसंदेशः ।